28

- Title – कुमार सम्भव
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - कुमार संभवम (साहित्य)
- Revisor -
- Author -
- Remarks- पूर्ण

ॐ
कु॰
१

ॐश्रीगणेशायनमः॥नमःसरस्वत्यै॥अस्त्युत्तरस्यांदिशिदेवतात्माहिमालयोना
मनगाधिराजः॥पूर्वापरौवारिनिधीवगाह्यस्थितःपृथिव्याइवमानदण्डः॥१॥
यंसर्वशैलाःपरिकल्प्यवत्संमेरौस्थितेदोग्धरिदोहदक्षेभास्वंतिरत्नानिमहौष
धीश्चपृथूपदिष्टांदुदुहुर्धरित्रीं॥२॥अनंतरत्नप्रभवस्ययस्यहिमंनसौ
भाग्यविलोपिजातंएकोहिदोषोगुणसंनिपातेनिमज्जतीन्दोःकिरणे
ष्विवांकः॥३॥यश्चाप्सरोविभ्रममंडनानांसंपादयित्रींशिखरैर्बिभर्तिब
लाहकछेदविभक्तरागामकालसंध्यामिवधातुमत्तां॥४॥आमेखलंसंच
रतांघनानांछायामधःसानुगतांनिषेव्यउद्वेजितावृष्टिभिराश्रयंतेशृं
गाणियस्यातपवंतिसिद्धाः॥५॥पदंतुषारस्रुतिधौतरक्तंयस्मिन्नदृष्ट्वापि
हतद्विपानांविंदंतिमार्गंनखरंध्रमुक्तैर्मुक्ताफलैःकेशरिणांकिराताः॥६

2

श्रीराम॥
१

3

न्यस्ताक्षरा धातुरसेन यत्र भूर्यत्वचः कुंजरविंदुशोणाः। व्रजंति विद्याधरसुंदरीणां
मनंगलेखक्रिययोपयोगं॥७॥ यः पूरयन्कीचकरंध्रभागान्दरीमुखोत्थेन समी
रणेन उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगंतुं॥८॥ कपोलकं ल ७२
डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणां। यत्र स्रुतक्षीरतया प्रसूतः सानूनि
गंधः सुरभीकरोति॥ ९ ॥ वनेचराणां वनितासखानां दरीगृहोत्संगनिष
क्तभासः भवंति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥१०॥ उद्वेजयत्यं
गुलिपार्ष्णिभागान्मार्गे शिलीभूतहिमेपि यत्र नदुर्वहश्रोणिपयोधरा।
भिंदंति मंदां गतिमश्वमुख्यः॥११॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवा
भीतमिवांधकारं क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव॥१२॥ लां
गूलविक्षेपविसर्पिशोभैरितस्ततः चंद्रमरीचिगौरैः यस्यार्थयुक्तं गिरिराज

शब्दं कुर्वंति बालव्यजनैश्चमर्यः॥१३॥ यत्रांशुकाक्षेपविलज्जितानांय
२॥ दृच्छया किंपुरुषांगनानां दरीगृहद्वारविलंबिबिंबास्तिरस्करिण्यो जलदा भवंति॥१४॥
भागीरथीनिर्झरशीकराणां वोढा मुहुः कंपितदेवदारुः यद्वायुरन्विष्टमृगैः कि
रातैरासेव्यते भिन्नशिखंडिबर्हः॥१५॥ सप्तर्षिहस्तावचितावशेषान्यधो विवस्वान्प
रिवर्त्तमानः पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः॥१६॥ यज्ञा
ङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च॥ प्रजापतिः कल्पितयज्ञभागं शै
लाधिपत्यं स्वयमन्वतिष्ठत्॥१७॥ स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थि
तये स्थितिज्ञः मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे॥१८॥
कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसंगे मनोहरं यौवनमुद्व २॥
हंत्या गर्भोऽभवद्भूधरराजपत्न्याः॥१९॥ असूत सा नागवधूपभोग्यं मैनाकं श्रीराम॥

मंभोनिधिबद्धसख्यंक्रुद्धेऽपिपक्षछिदिवृत्रशत्राववेदनाज्ञंकुलिशक्षतानां॥२०॥
अथावमानेनपितुःप्रयुक्तादक्षस्यकन्याभवपूर्वपत्नीसतीसतीयोगविसृष्ट
देहातांजन्मनेशैलवधूंप्रपेदे॥२१॥सांभूधराणामधिपेनतस्यांसमाधिमत्या
मुदपादिभव्यासम्यक्प्रयोगादपरिक्षतायांनीताविवोत्साहगुणेनसंपत्॥२२॥
प्रसन्नदिक्पांसुविविक्तवातंशंखस्वनानंतरपुष्पवृष्टिःशरीरिणांस्थावरजं
गमानांसुखायतज्जन्मदिनंबभूव॥२३॥तयादुहित्रासुतरांजनित्रीस्फुरत्प्रभामं
डलयाचकाशेविदूरभूमिर्नवमेघशब्दादुद्भिन्नयारत्नशलाकयेव॥२४॥दि
नेदिनेसापरिवर्द्धमानालब्धोदयाचांद्रमसीवलेखापुपोषलावण्यमयान्वि
शेषान्ज्योत्स्नांतराणीवकलांतराणि॥२५॥तांपार्वतीत्याभिजनेननाम्नाबं
धुप्रियांबंधुजनोजुहावउमेतिमात्रातपसोनिषिद्धापश्चादुमाख्यांसुमुखी

जगाम॥२६॥ महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं॥ अनंतपुष्पस्य
मधोर्हि चूते द्विरेफमाला सविशेषसंगा॥२७॥ प्रभामहत्या शिखयेव दीपस्त्रिमा
र्गयेव त्रिदिवस्य मार्गः॥ संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च
॥२८॥ मंदाकिनीशैकतवेदिकाभिः सा कंदुकैः कृत्रिमपुत्रकैश्च॥ रेमे मुहुर्मध्यगता
सखीनां क्रीडारसं निर्विशतीव बाल्ये॥२९॥ तां हंसमालाः शरदीव गंगां महौषधीं
नक्तमिवात्मभासः॥ स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः॥३०॥ असं
भृतं मंडनमंगयष्टेरनासवाख्यं करणं मदस्य॥ कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं
साथ वयः प्रपेदे॥३१॥ उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविंदं॥ बभूव
तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन॥३२॥ अभ्युन्नतांगुष्ठनखप्रभाभिः
निक्षेपणाद्रागमिवोद्गिरंतौ॥ आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविंदश्रियमव्यवस्थां॥३३॥

तस्याः प्रविष्टा नतनाभिरंध्रं राजती लानवरोमराजिमुखेंदुभीतस्तनचक्रवाकीचंचुच्युतः शैवरमंजरीव ॥३९॥ त्रुटि

सा राजहंसैरिव संनतांगी गते मुलीलांचितविभ्रमेषु ॥ व्यनीयत प्रत्युपदेशलुब्धैरादित्सु

भिर्नूपुरशिंजतानि ॥३४॥ वृत्तानुपूर्वे च न चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये शेषां

गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ॥३५॥ नागेंद्रहस्तास्त्वचि कर्कश

त्वादेकांतशैत्यात्कदली विशेषाः लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमा

बाह्याः ॥३६॥ एतावता नन्वनुमेयशोभि कांचीगुणस्थानमनिंदितायाः आरोपितं

यद्गिरिशेन पश्चादनन्यनारीकमनीयमंकं ॥३७॥ तस्याः प्रविष्टा नतनाभिरंध्रं

राजत्तन्वी नवरोमराजिः नीवीमतीक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ३८॥

मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला आरोहणार्थं नवयौवने

न कामस्य सोपानमिव प्रयुक्तं ॥३९॥ अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं

पांडु तथा प्रवृद्धं मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रांतरमप्यलभ्यं ॥४१॥

शिरीषपुष्पाधिकसौकुमार्यौ बाहू तदीयाविति मे वितर्कः पराजितेनापि कृतौ
हरस्य यौ कंठपाशौ मकरध्वजेन ॥४१॥ चंद्रं गता पद्मगुणान्न भुंक्ते पद्मा
श्रिता चांद्रमसीमभिख्यां उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप
लक्ष्मीः ॥४२॥ पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थं
ततोनुकुर्याद्विशदस्य तस्याः ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥ स्वरेण तस्या स्मि॰
या॰ ६ ममृतस्रुतेव प्रजल्पितायामभिजातवाची अप्यन्यपुष्टा प्रतिकूलशब्दा श्रो
तुर्वितंत्रीरिव ताड्यमाना ॥४३॥ प्रवातनीलोत्पलनिर्विशेषमधीरवि
प्रेक्षितमायताक्ष्या तया गृहीतं नु मृगांगनाभ्यस्ततो गृहीतं नु मृगांग
नाभिः ॥४४॥ तस्याः शलाकांजननिर्मितेव कांतिर्भ्रुवोरानतलेखयोर्या
तां वीक्ष्य लीलाचतुरामनंगः स्वचापसौंदर्यमदं मुमोच ॥४५॥ लज्जा

तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः तं केशपाशं प्रसमीक्ष्य कुर्युर्वा
मा०२ लप्रियत्वं शिथिलं चमर्यः॥४८॥ सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशिता ते
न सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव॥४९॥ तां नारदः काम
चरः कदाचित्कन्यां किल प्रेक्ष्य पितुः समीपे समादिदेशैकवधूं भवित्रीं प्रेम्णा श
रीरार्द्धहरां हरस्य॥५०॥ गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिला
षः ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यं॥५१॥ अयाचितारं न
हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक। अभ्यर्थनाभंगभयेन साधुर्माध्यस्थ्य
मिष्टेऽप्यवलंबतेर्थे॥५२॥ यदैव पूर्वे जनने शरीरं सा दक्षरोषात्सुतनुः ससर्ज तदा न०४
प्रभृत्येव विमुक्तसंगः पतिः पशूनामपरिग्रहोऽभूत्॥५३॥ स कृत्तिवासास्तप
से यतात्मा गंगाप्रवाहोक्षितदेवदारुः प्रस्थं हिमाद्रेर्मृगनाभिगंधि किंचि
त्क्वणत्किन्नरमध्युवास॥५४॥ गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवती
र्वसानाः मनःशिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु॥५५॥ तुषा

रसंघातशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान् दृष्टः कथंचिद्गवयैर्विविग्नैर
सोढसिंहध्वनिरुन्ननाद॥५५॥ तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यंतरमष्ट
मूर्त्तिः स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चकार॥५६॥ अनर्घ्यम
र्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा आराधनायास्य सखीसमे
तां समादिदेश प्रयतां तनूजां॥५७॥ प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गि
रिशोनुमेने विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः॥५७॥ अवचि
तबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषां चोपनेत्री गिरिशं
मुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा [illegible] तच्छिरश्चंद्रपादैः॥५८॥

इति श्रीकुमार(संभवे)महाकव्ये कालिकृतौ समाप्तं प्रथमः सर्गः॥

देवं त्रैलोक्यजीवातुं त्रिवेदीहृदयंगमं॥ [illegible] वंदे शिवे देवशिखामणिं॥ श्रीराम॥ राम
राम॥ राम॥ राम॥

ॐ श्रीगणेशाय नमः॥ तस्मिन्विप्रकृताः काले तारकेण दिवौकसः। तुरासाहं पुरोधाय
धाम स्वायंभुवं ययुः॥१॥ तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियां सरसां सुप्तपद्मा
नां प्रातर्दीधितिमानिव॥२॥ नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने गुणत्र
यविभागाय पश्चाद्भेदमुपेयुषे।३। अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखं वागी
शं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥४॥ यदमोघमपामन्तरुप्तं बीजमज त्वया अतश्च
राचरं विश्वं प्रभवस्तस्य गीयते॥५॥ तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्प्रल
यस्थितिसर्गाणामेकः कारणतां गतः॥६॥ स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।
भाजः प्रसूतिः सर्गस्य तावेव पितरौ स्मृतौ॥७॥ स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते स्वप्ना
वबोधौ भूतानां तावेव प्रलयोदयौ॥८॥ जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः जगदा
दिरनादिस्त्वं जगदीशो निरीश्वरः॥९॥ आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मन

कु.स.
६

ऽऽत्मना त्मानमात्मना कृतिना च त्वमात्मन्येव प्रलीयसे॥१०॥ द्रवः संघातकठिनः स्थूलः सू

क्ष्मो लघुर्गुरुः व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥११॥ उद्घातः प्रणवो यासां न्या

य्यैस्त्रिभिरुदीरणं कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिरां॥१२॥ त्वामामनन्ति प्रकृतिं पुरु

षार्थप्रवर्तिनीं तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥१३॥ त्वं पितॄणामपि पिता देवानां

मपि देवता परतोऽपि परश्चासि विधाता वेधसामपि॥१४॥ इति तेभ्यः स्तुतीः श्रुत्वा यथार्थहृ

दयंगमाः प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः॥१५॥ त्वमेव हव्यं होता च भोज्यं भोक्ता

च शाश्वतः वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परं॥१६॥ प्रथ्वीविर्गाहः॥ पुराणस्य कवेस्तस्य

चतुर्मुखसमीरिता प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी॥१७॥ भगवानुवाच॥ स्वाग

तं स्वानधीकारान् प्रभावैरवलम्ब्य वः युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः॥१८॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः॥१९॥ प्र

श्रीराम॥
६

12

शमादर्चिषामेतदनुद्गीर्णसुरायुधं वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥२०॥ किंचाय
मरिदुर्वारः पाणौ पाशः प्रचेतसः मन्त्रेणहतवीर्यस्य फणिनो दैन्यमाश्रितः ॥२१॥ कुवेरस्य
मनःशल्यं शंसतीव पराभवं अपविद्धगदो बाहुः भग्नशाख इव द्रुमः ॥२२॥ यमोऽपि विलिख
न्भूमिं दण्डेनास्तमितत्विषा कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवं ॥२३॥ अमी च कथमा
दित्याः प्रतापक्षतिशीतलाः चित्रन्यस्ता इव गताः प्रकामालोकनीयतां ॥२४॥ पर्याकुलत्वान्म
रुतां वेगभङ्गोऽनुमीयते अम्भसामोघसंरोधः प्रतीपगमनादिव ॥२५॥ आवर्जितजटामौ
लिविलम्बिशशिकोटयः रुद्राणामपि मूर्द्धानः क्षतहुंकारशंसिनः ॥२६॥ लब्धप्रतिष्ठाः प्रथ
मं यूयं किं बलवत्तरैः अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥२७॥ तद्ब्रूत वत्साः किमितः प्रा
र्थयध्वं समागताः मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥२८॥ ततो मन्दानिलोद्धूत
कमलाकरशोभिना गुरुं नेत्रसहस्रेण प्रेरयामास वासवः ॥२९॥ एवं यदात्थ भगवन्ना
मृष्टं नः परैः पदं प्रत्येकं विनियुज्यात्मा कथं न ज्ञास्यसि प्रभो ॥३१॥ भवल्लब्धवरोदीर्णस्ता

कु॰ र॰
७

रकाख्यो महासुरः उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥३२॥ सर्वाभिः सर्वदा चंद्रस्तं क
लाभिर्निषेवते नादत्ते केवलां लेखां हरचूडामणीकृतां ॥३३॥ पुरे तावंतमेवास्य तनोति
रविरातपं दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥३४॥ व्यावृत्तिगतिरुद्या
ने कुसुमस्तेयसाध्वसात् ॥ न वाति वायुस्तत्पार्श्वे तालवृंतानिलाधिकं ॥३५॥ प
र्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः उद्यानपालसामान्यमृतवस्तमुपासते ॥३६॥
तस्योपायनयोग्यानि रत्नानि सरितां पतिः कथमप्यंभसामंतरानिष्पत्तेः प्रतीक्षते
॥३७॥ ज्वलन्मणिशिखाश्चैनं वासुकीप्रमुखा निशि स्थिरप्रदीपतामेत्य भुजंगाः प
र्युपासते ॥३८॥ तत्कृतानुग्रहापेक्षी प्रत्यहं दूतहारितैः अनुकूलयतींद्रोपि कल्प
द्रुमविभूषणैः ॥३९॥ इत्थमाराध्यमानोपि क्लिश्नाति भुवनत्रयं शाम्येत्प्रत्युपकारे
ण नोपकारेण दुर्जनः ॥४०॥ तेनामरवधूहस्तैः सदयालूनपल्लवाः अभिज्ञाश्छेदपाता छे॰र
नां क्रियंते नंदनद्रुमाः ॥४१॥ वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः चामरैः
सुरवंदीनां बाष्पसीकरवर्षिभिः ॥४२॥ मंदाकिन्याः पयःशेषं दिग्वारणमदा

श्रीराम॥
७॥

कु॰ क

विलं हेमांभोरुहसस्यानां तद्वाप्यो धाम सांप्रतं ॥४४॥ भुवनालोकनप्रीतिः स्वर्गिभि
र्नानुभूयते खिलीभूते विमानानां तदापातभयात्पथि ॥४५॥ यज्वभिः संभृतं हव्यं वित
तेष्वध्वरेषु सः जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥४६॥ उच्चैरुच्चैःश्रवास्तेन हयं
रत्नमहारि च देहबद्धमिवेंद्रस्य चिरकालार्जितं यशः ॥४७॥ तस्मिन्नुपायाः सर्वे नः क्रूरे प्र
तिहतक्रियाः वीर्यवंत्योषधानीव विकारे सान्निपातिके ॥४८॥ जयाशा यत्र चास्माकं
प्रतिघातोत्थितार्चिषा हरिचक्रेण तेनास्य कंठे निष्कमिवार्पितं ॥४९॥ तदीयास्तोयदेष्व
द्य पुष्करावर्तकादिषु अभ्यस्यंति तटाघातं निर्जितैरावता गजाः ॥५०॥ तदिच्छामो विभो स्र
ष्टुं सेनान्यं तस्य शांतये कर्मबंधच्छिदं धर्मं भवस्येव मुमुक्षवः ॥५१॥ गोप्तारं सुरसैन्यानां यं
पुरस्कृत्य गोत्रभित् प्रत्यानेष्यति शत्रुभ्यो वंदीमिव जयश्रियम् ॥५२॥ वचस्यवसिते
तस्मिन् ससर्ज गिरमात्मभूः गर्जितानंतरां वृष्टिं सौभाग्येन जिगाय या ॥५३॥ संपत्स्यते
वः कामोयं कालः कश्चित्प्रतीक्ष्यतां न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥५४॥

६
कु.सं.
८

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयं विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतं ॥५५॥
वृतं तेनेदमेव प्राङ्मया चास्मै प्रतिश्रुतं वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥५६॥
संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः अंशादृते निषिक्तस्य नीललोहितरेतसः ॥५७॥ स
हि देवः परं ज्योतिस्तमःपारे व्यवस्थितं परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना ॥५८॥
उमारूपेण ते यूयं संयमस्तिमितं मनः शंभोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥५९॥
उभे एव क्षमे वोढुमुभयोर्बीजमाहितं सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ॥६०॥
तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभि
॥६१॥ इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे मनस्याहितकर्तव्यास्तेऽपि प्रतिदिवं य
युः ॥६२॥ तत्र निश्चित्य कंदर्पमगमत्पाकशासनः मनसा कार्यसंसिद्धित्वराद्विगुण
रंहसा ॥६३॥ अथ स ललितयोषिद्भ्रूलताचारुशृंगं रतिवलयपदांके चापमासज्य कं

श्रीराम
८

ठे सहचरमधुहस्तन्यस्तचूतांकुरास्त्रः शतमखमुपतस्थे प्रांजलिः पुष्पधन्वा ॥६४॥

कुमार०२ इति श्रीमहाकाव्ये कालिदासकृतौ कुमारसंभवे द्वितीयः सर्गः २॥ श्रीराम॥ ॥ ॥ ॥

तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात प्रयोजना
पेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥१॥ स वासवेनास
नसन्निकृष्टमितो निषीदेति विसृष्टभूमिः भर्तुः प्रसादं प्रतिनं
द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनं ॥२॥ केनाभ्यसूया पदकांक्षिणा
ते नितांतदीर्घैर्जनिता तपोभिः यावद्भवत्याहितसायकस्य म
त्कार्मुकस्यास्य निदेशवर्ती ॥४॥ असंमतः कस्तव मुक्तिमार्गं पुन
र्भवक्लेशभयात्प्रपन्नः बद्धश्चिरं तिष्ठतु सुंदरीणां आरेचितभ्रूचतुरैः
विलासैः ॥५॥ अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते

आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत्ते करणीयमस्ति अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते ॥३॥

ॐ॥
॥कु॰॥
॥टी॰॥

न्तोः कस्यार्थधर्मौ वद पीडयामि सिंधोस्तटावोघ इव प्रवृद्धः॥६॥ कामेकप
त्नीव्रतदुःखसीलां लोलं मनश्चारुतया प्रविष्टां नितंबिनीमिछसि मुक्त
लज्जां कंठे स्वयंग्राहनिषक्तबाहुं॥७॥ कयासि कामिन्सुरतापराधे पाद
नतः कोपनयावधूतः तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं
शरीरं॥८॥ प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः विभे
तु मोघीकृतबाहुवीर्यः स्त्रीभ्योपि कोपस्फुरि[ताधराभ्यः॥९॥] प्रसादत्कुसुमायुधो
पि सहायमेकं मधुमेव लब्ध्वा कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्यु
तिं के मम धन्विनोन्ये॥१०॥ अथोरुदेशादवतार्य पादमाक्रांतिसंभावि
तपादपीठं संकल्पितार्थे विवृतात्मशक्तिमाखंडलः काममिदं बभाषे
॥११॥ अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये श्रीराम॥
॥हे॥
सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च वज्रं तपोवीर्यमहत्सु कुंठं त्वं सर्वतोगामि च साधकं च॥१२॥

१

व्यादिश्यतेभूधरतामवेक्ष्यकृष्णेनदेहोद्वहनायशेषः॥१३॥आशंसता बाणगतिं
वृषांकेकार्यंत्वयानःप्रतिपन्नकल्पं।निबोधयज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सि
तमेतदेव॥१४॥अमीहिवीर्यप्रभवंभवस्यजयायसेनान्यमुशंतिदेवाः।सचत्वदेकेषु
निपातसाध्योब्रह्मांगभूर्ब्रह्मणियोजितात्मा॥१५॥तस्मैहिमाद्रेःप्रयतांतनूजांयतात्म
नेरोचयितुंयतस्व।योषित्सुतद्वीर्यनिषेकभूमिःसैवक्षमेत्यात्मभुवोपदिष्टं॥१६॥गुरो
र्नियोगाच्चनगेंद्रकन्यास्थाणुंतपस्यंतमधित्यकायां।अन्वास्तइत्यप्सरसांमुखेभ्यः
श्रुतंमयामत्प्रणिधिःसवर्गः॥१७॥तद्गच्छसिद्ध्यैकुरुदेवकार्यमर्थोयमर्थांतरलभ्यए
वअपेक्षतेप्रत्ययमुत्तमंत्वांबीजांकुरःप्रागुदयादिवांभः॥१८॥तस्मिन्सुराणांविज
याभ्युपायेतवैवनामास्त्रगतिःकृतीत्वं।अप्यप्रसिद्धंयशसेहिपुंसामनन्यसाधार
णमेवकर्म॥१९॥सुराःसमभ्यर्थयितारएतेकार्यंत्रयाणामपिविष्टपानां।चापेनतेकर्म
नचातिहिंस्रमहोबतासिस्पृहणीयवीर्यः॥२०॥मधुश्चतेमन्मथसाहचर्यादसा

मृगाः प्रियालुद्रुममंजरीणां रजःकणैर्विघ्नितदृष्टिपाताः मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ३१
कु॰ चूतांकुरास्वादकषायकंठः पुंस्कोकिलो यन्मधुरं चुकूज मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ३२ ११ मन्र३

१॰ वअनुक्तोपि सहाय एव समीरणोप्रेरयिता भवेति व्यादिश्यते केन हुताशनस्य १८ तथेति शेषामिव भर्तुरा
ज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदंगमिंद्रः १९ स माधवे
नाभिमतेन सख्या रत्या च साशंकमनुप्रयातः अंगव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम
२॰ तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती संकल्पयोनेरभिमानभूतमात्मानमा
धाय मधुर्जजृंभे २१ कुबेरगुप्तां दिशमुष्णरश्मौ गंतुं प्रवृत्ते समयं विलंघ्य दिग्दक्षिणा गंधवहं मुखेन व्यलीकनि ले॰५
श्वासमिवोत्ससर्ज २२ असूत सद्यः कुसुमान्यशोकः स्कंधात्प्रभृत्येव सपल्लवानि पादेन नापेक्षित सुंदरीणां
संपर्कमाशिंजितनूपुरेण २३ सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे निवेशयामास मधुर्द्वि
रेफान्नामाक्षराणीव मनोभवस्य २४ वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गंधतया स्म चेतः प्रायेण साम
ग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः २५ बालेंदुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलो
हितानि सद्यो वसंतेन समागतानां नखक्षतानीव वनस्थलीनां २६ लग्नद्विरेफांजनपंक्तिचित्रं मुखे
मधुश्रीस्तिलकं निवेश्य रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार २७ हिमव्यपाया
द्विशदाधराणामपांडुरीभूतमुखच्छवीनां स्वेदोद्गमः किंपुरुषांगनानां चक्रे पदं पत्रविशेषकेषु २८
तपस्विनः स्थाणुवनौकसस्तामकालिकीं वीक्ष्य मधुप्रवृत्तिं प्रयत्नसंस्तंभितविक्रियाणां कथं
चिदीशा मनसां बभूवुः २९ तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने काष्ठागतस्नेह श्रीराम॥
रसानुविद्धं द्वंद्वानि भावं क्रियया विवव्रुः ३॰ मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः २॰

सु॰

ओं ॥ कु ॥

११ न्नशरीरपातां त्रिलोचनं संयमिनं ददर्श ॥४४॥ पर्यंकबंधस्थिरपूर्वकायमृज्वा
यतं सन्नमितोभयांसं उत्तानपाणिद्वयसन्निवेशात्प्रफुल्लराजीवमिवांकमध्ये ॥४५॥
भुजंगमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रं कंठप्रभासंगविशेषनी
त्रिभिःकुलकैः लां मृगत्वचं ग्रंथिमतीं वसानं ॥४६॥ किंचित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रिया
यां विरतप्रसंगैः नेत्रैरविस्पंदितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥४७॥ अवृष्टि
संरंभमिवांबुवाहमपामिवाधारमनुत्तरंगं अंतश्चराणां मरुतां निरोधान्निवातनि
ष्कंपमिव प्रदीपं ॥४८॥ कपोलनेत्रांतरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः म
णालसूत्राधिकसौकमार्यां बालस्य लक्ष्मीं ग्लपयंतमिंदोः ॥४९॥ मनो नवद्वार
निषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यं यमक्षरं वेदविदो विदुस्तमात्मा

नमात्मन्यवलोकयंतं ॥ पंचभिः सप्तभिः कुलकं ॥ [illegible] श्रीराम ॥ ११

शृंगेण च स्पर्शनिमीलिताक्षीं मृगीमकंडूयत कृष्णसारः॥३१॥ ददौ रसात्पंकजरेणुगं
धि गजाय गंडूषजलं करेणुः अर्धोपभुक्तेन बिसेन जायां संभावयामास रथांगनामा॥३२॥
गीतांतरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपत्रलेखं पुष्पासवाघूर्णितनेत्रशोभि
प्रियामुखं किंपुरुषश्चुचुंबे॥३३॥ पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोह
राभ्यः लतावधूभ्यस्तरवोप्यवापुर्विनम्रशाखाभुजबंधनानि॥३४॥ श्रुताप्सरोगीतिर
पि क्षणेस्मिन् हरः प्रसंख्यानपरो बभूव आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्र
भवो भवंति॥३५॥ लतागृहद्वारगतोथ नंदी वामप्रकोष्ठार्पितहेमवेत्रः मुखार्पितैकांगुलिसंज्ञ
येव मा चापलायेति गणान्व्यनैषीत्॥३६॥ निष्कंपवृक्षं निभृतद्विरेफं मूकांडजं शां
तमृगप्रचारं तच्छासनात्काननमेव सर्वं चित्रार्पितारंभमिवावतस्थे॥३७॥ दृष्टिप्र
पातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे प्रांतेषु संसक्तनमेरुशाखं ध्यानास्पदं भूत
पतेर्विवेश॥३८॥ स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्यां आसीनमासा

ओम्॥

रामजी
कु०
२३

ओं श्रीगणेशाय नमः ॥ ॥ अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता विधिना प्रतिपाद
यिष्यता नववैधव्यमसह्यवेदनं ॥१॥ अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने न विवे चर
द तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनं ॥२॥ अयि जीवितनाथ जीवसीत्यभिधायोत्थितया त
या पुरः ददृशे पुरुषाकृतिः क्षितौ हरकोपानलभस्मकेवलं ॥३॥ अथ सा पुनरेव विह्वला वसुधालि
गनधूसरस्तनी विललाप विकीर्णमूर्द्धजा समदुःखामिव कुर्वती स्थली ॥४॥ उपमानमभू
द्विलासिनां करणं यत्तव कान्तिमत्तया तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥
॥५॥ क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः नलिनीं क्षतसेतुबंध-
नो जलसंघात इवासि विद्रुतः ॥६॥ कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतं
किमकारणमेव दर्शनं विलपंत्यै रतये न दीयते ॥७॥ स्मरसि स्मर मेखलागुणैः ॥
उत गोत्रस्खलितेषु बंधनं च्युतकेसरदूषितेक्षणान्यवतंसोत्पलताडितानि वा ॥
ये ॥८॥ हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवं उपचारपदं न चेदिदं त्वमनंगः
कथमक्षता रतिः ॥९॥ परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ॥ विधिना जन एष वं
चितस्त्वदधीनं खलु देहिनां सुखं ॥१०॥ रजनीतिमिरावकुंठिते पुरमार्गे घनशब्द

श्रीराम॥
२३

गैः स्फुरद्बालकदंबकल्पैः साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥
॥६८॥ अथेंद्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य हेतुं स्वचेतोविकृतेर्दिदृ-
क्षुर्दिशामुपांतेषु ससर्ज दृष्टिं ॥६९॥ स दक्षिणापांगनिविष्टमुष्टिं नतांसमाकुंचित-
सव्यपादं ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिं ॥ तपःपरामर्शविवृद्धमन्यो-
र्भ्रूभंगदुःप्रेक्ष्यमुखस्य तस्य स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात
॥७१॥ क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरंति तावत्स वह्निर्भवनेत्रज-
न्मा भस्मावशेषं मदनं चकार ॥ तीव्राभिषंगप्रभवेन वृत्तिं मोहेन संस्तंभयतेंद्रिया-
णां अज्ञातभर्तृव्यसना मुहूर्त्तं कृतोपकारेव रतिर्बभूव ॥७३॥ तमाशु विघ्नं तपस-
स्तपस्वी वनस्पतिं वज्र इवावभज्य स्त्रीसन्निकर्षं परिहर्त्तुमिच्छन्नंतर्दधे भूतपतिः सभूतः ॥ ७४
शैलात्मजापि पितुरुच्छिरसोभिलाषं व्यर्थं समीक्ष्य ललितं वपुरात्मनश्च सख्योः समक्षमि-
ति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी कथंचित् ॥ ७५ अथ सपदि मुकुलिताक्षीं रुद्रसंरंभ-
भीत्या दुहितरमनुकंप्यामद्रिरादाय दोर्भ्यां सुरगज इव बिभ्रत्पद्मिनीं दंतलग्नां प्रतिपथगतिरासीद्वे-
गदीर्घीकृतांगः ७६ इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ कामदहनो नाम
तृतीयः सर्गः ३ ॥ ॥ श्री। श्रीराम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नि॰ ४